अम्लिकावटकः, पुं, (अम्लिकाया वटकः।) अम्लिकां स्वेदयित्वा जलेन सह मर्दयित्वा तत्संस्कृतजले मग्नवटकः। अम्लवड़ा इति भाषा। अस्य गुणाः। रुच्यग्निकारित्वं। वटकगुणतुल्यगुणत्वञ्च। इति भावप्रकाशः॥
("अम्लिकां स्वेदयित्वा तु जलेन सह मर्दयेत्।
तन्नीरे कृतसंस्कारे वटकान् मज्जयेज्जनः।
अम्लिकावटकास्ते तु रुच्या वह्निप्रदीपनाः।
वटकस्य गुणैः पूर्व्वैरेतेऽपि च समन्विताः"॥)

अम्लीका, स्त्री, अम्लिका। इत्यमरटीकायां रायमुकुटः॥

अम्लोटकः, पुं, (अम्लं उटं पत्रं यस्य सः।) अश्मन्तकवृक्षः। अम्लकुचाइ इति ख्यातः। इति रत्नमाला॥

अय ङ गतौ। (इति कविकल्पद्रुमः॥) ङ अयते। इति दुर्गादासः॥

अयः, पुं, (एति सुखमनेन, इण्+करणे अच्।) शुभावहविधिः। मङ्गलानुष्ठानं। इत्यमरः॥ (कल्याणदायकं दैवं।
"स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः"।
इति रघुवंशे। नरकभेदः। अयःपानमप्यत्र। इति वैद्यकरसेन्द्रसारसङ्ग्रहः॥)

अयः,[स्] क्ली,(इण गतौ, असुन्।)लौहं। इत्यमरः॥ (गुडूच्यादिलौहं।
"आयुःप्रदाता बलवीर्य्यधाता,
रोगापहर्त्ता मदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदस्ति,
रसायनं श्रेष्ठतमं नराणां"॥ * ॥
"गुडूचीसारसंयुक्तं त्रिकत्रयसमन्वयः।
वातरक्तं निहन्त्याशु सर्व्ववातहरं परं"॥)

अयनं, क्ली, (अय+भावे ल्युट्।) शास्त्रं। यथा,—
"ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"।
इति तिथ्यादितत्त्वं॥ पन्थाः। सूर्य्यस्य उत्तरदक्षिणदिग्गमनं। तद्यथा। माघादिषण्मासाः उत्तरायणं। श्रावणादिषण्मासाः दक्षिणायनं। इत्यमरः॥ गमनं। गत्यर्थायधातोर्भावेऽनट्॥ रविसंक्रान्तिविशेषः। यथा भविष्यमात्स्यज्योतिषेषु।
"मृगकर्कटसंक्रान्ती द्वे तूदक्दक्षिणायने।
विषुवती तुला मेषे गोलमध्ये तथापराः"॥
मृगो मकरः। गोलो राशिचक्रं। देवीपुराणे,
"यावद्विंशकला भुक्ता तत्पुण्यं चोत्तरायणे।
निरंशे भास्करे दृष्टे दिनान्तं दक्षिणायने"॥
तत्र स्नानदानादौ कोटिगुणफलं भवति। यथा मात्स्ये।
"अयने कोटिगुणितं लक्षं विष्णुपदीषु च।"
इत्यादि।
"अयने विषुवे चैव शयने बोधने हरेः।
अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु"॥
इति तिथ्यादितत्त्वं ॥ * ॥ सूर्य्यगतिविशेषः। यथा,—
"मृगसंक्रान्तितः पूर्व्वं पश्चात्तारादिनान्तरे।
एकवर्षं चतुःपञ्चपलमानक्रमेण तु॥
षट्षष्टिवत्सरानेकदिनं स्यादयनं रवेः।
एवं चतुःपञ्चदिनमयनारम्भणं क्रमात्॥
व्युत्क्रमेण च तद्वत् स्यादुदग्यानं रवेर्ध्रुवं।
कर्किसंक्रमणे तद्वदभितो दक्षिणायनं"॥
इति ज्योतिस्तत्त्वं॥

अयनांशः, पुं, (अयनस्य अंशः भागः।) सूर्य्यगतिविशेषस्य भागः। अथायनांशलग्नसाधनं।
"लग्नं लग्नान्तरं कृत्वा अयनांशैः प्रपूरयेत्।
खानलैर्हरते भागं मिश्रयित्वा दिने दिने"॥
अस्यार्थः। लग्नं रामोगवेदैरित्याद्युक्तं लग्नान्तरं कृत्वा यथा मेषलग्नं ३। ४७ लग्नान्तरं वृषलग्नं ४। १७ अत्रान्तरेण द्वयोराधिक्येन ३० त्रिंशत्पलं तच्चायनांशैः पूरयेत्॥ अयनांशस्तु जातकार्णवोक्तः। यथा,—
"शाकमेकाब्धिवेदोनं द्विः कृत्वा दशभिर्हरेत्।
लब्धं हीनञ्च तत्रैव षष्ट्याप्तास्त्वायनांशकाः"॥
इति। लब्धस्थाने लब्धेन इति पाठः सिद्धान्तरहस्ये॥ ते च इदानीं चैत्रस्यैकादशाहे सम्भवात् ऊनविंशतिसंख्यकाः। ते च पुनःखानलैः ३० त्रिंशता हरेत्। भागलब्धिस्तु ऊनविंशतिः १९। तच्च मेषलग्ने मिश्रयित्वा ४। ६ षट्पलाधिकदण्डचतुष्टयात्मकं मेषलग्नं भवति। एवं वृषादिकमूह्यं। किन्तु लग्नान्तरेण यत्राधिकं लभ्यते तत्राधिकं लग्नं भवति। एवं यत्र लग्नान्तरेण हानिस्तत्र लग्नेऽपि हानिरिति निष्कर्षः॥ ० ॥ इदानीं स्पष्टज्ञानार्थं पद्येन लिख्यते। बाणैवदो ४। ५-ऽष्टवेदैः श्रुति ४। ४८-रिभनयनैरिन्द्रियं ५। २८ -खाम्बुनेषु ५। ४०-र्बाणो वेदानलैः ५। ३४ -खाग्निभिरिषु ५। ३०-रिषुरङ्काग्निने ५। ३६ -षुःकुवेदै ५। ४१-र्बाणोनागेन्दुभिस्तु ५। १८ श्रुतिरपि रसरामै ४। ३६-र्गुणाः सप्तबाणैः ३।५७ रामोऽश्वाङ्किस्तु ३।४७-सिद्धान्तजमतमयनांशादिदं लग्नमानं॥ एतच्च तमोलिप्तादिदेशीयं प्रागुक्तायनांशसाधितं॥ ० ॥ अङ्केन वेदो ४। ६ मेषः स्यात् वसुवेदैः सुखं ४।४८ वृषः। मुनियुग्मैः शरो ५।२७ द्वन्द्वः व्योमाब्धिबाणा ५। ४०-कर्कटः॥ वेदरामैः शरः ५। ३४ सिंहः कन्याङ्कयुग्मपञ्चकः ५। २९। तुला ऋषिरामपञ्च ५। ३७-वृश्चिकः खाब्धिपञ्चकः ५। ४०॥ नवचन्द्रबाणा ५। १९— धनुर्वेदरामैः सुखं ४। ३४ मृगः। वसुपञ्चत्रयः ३। ५८ कुम्भः ऋषिवेदत्रयो ३। ४७ भाषः ॥ * ॥ शत्रुर्वेदश्च ४। ६ मेषो नववसुखसुख ४-४९। -गोर्म्मृत्युयुग्मैः शिवाशो ५। २८ द्वन्द्वोऽङ्काप्यित्तबाणो ५।३९ हिमकरभवनो रामरामैः कलम्बः ५। ३३। सिंहः कन्याजरामैरिषु ५। ३१-रिषुजसुखाभोषु ५। ३४-यूकोटलिष्ट्वी ५। ४१ वेदेशास्योऽष्टष्वीस्मरहरमुख ५। १८ -कोदण्डमाऊर्वराहाः॥ बन्धू रामश्च वेदो ४। ३४ रषिसुतभवनः पर्व्वतः पञ्चरामः ३। ५७ कुम्भो मीनश्च भुङ्क्ते गिरिसुखदहनं ३। ४७ प्रत्यहं प्रक्रमेण। अस्तं यामित्रराशावनुदिनमवसायश्च राजीवनाथो यद्यातिस्म द्रुतं स्यादुदयमनुदिवारात्रमाऊर्वराहाः॥ ० ॥ लग्नं लग्नान्तरं कृत्वेति प्रकारान्तरेण यदुक्तं तदपि पद्येन लिख्यते यथा। वेदोऽङ्कै ४। ६-रिभवेदैः श्रुति ४। ४८-रिषुरिभपक्षैः ५। २८ कुवेदैश्च बाणो ५। ४१ बाणो रामानलै ५। ३३-रिन्द्रियमपि नवाक्षै ५। २९ रिषुः सप्तरामैः ५। ३७ बाणः शून्याब्धिने ५।४० -षुर्धृतिभि ५। १८-रिषुगुणैरब्धि ४। ३५-रष्टेषबाणी ३।५८ रामोऽश्वाङ्किस्तु ३। ४७ सिद्धान्तजमतमयनांशादिदं लग्नमानं॥
"चैत्रस्यैकादशाहे तु विषुवारम्भणं यदा।
तदैतल्लग्नमानं हि ज्ञेयमन्यत्र साधनात्"॥
इति ज्योतिषसंग्रहः॥ (गतिः। गमनं। मार्गः।
"अगस्त्यचिह्नादयनात् समीपं
दिगुत्तरा भास्वति सन्निवृत्ते"।
इति रघुवंशे। स्थानं। भूमिः। समरसमारम्भकाले योधानां यथाप्रधानं युद्धभूमौ पूर्व्वापरादिदिग्विभागेनावस्थितिस्थानं। सेनासन्निवेशविशेषरूपव्यूहप्रवेशमार्गः।
"अयनेषु च सर्व्वेषु यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व्व एव हि"॥
इति भगवद्गीता। आश्रयः। विश्रामस्थानं।
"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्व्वं तेन नारायणः स्मृतः"॥
इति मनुः। गृहं। वसतिः। वासस्थानं। शास्त्रं। भावसाधनो ग्रन्थः।
"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनञ्चैव वेदाङ्गानि षड़ेव तु॥
छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ कथ्यते।
ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते"॥
इति कूर्म्मपुराणे।)

अयानयीनः, पुं, शारः। यथा। अनुपदसर्व्वान्नायानयं बद्धा भक्षयति नेयेषु। अयानयः स्थलविशेषः। तन्नेयः। अयानयीनः शारः। इति सिद्धान्तकौमुदी॥

अयन्त्रितः, त्रि, (न यन्त्रितः, नञ्समासः।) अबाधः। अनर्गलः। इति हेमचन्द्रः॥ (अनियन्त्रितः। अनियमितः। स्वाधीनः।
"सावित्रीमात्रसारोऽपि वरं विप्रः सुयन्त्रितः।
नायन्त्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी"॥
इति मनुः।)

अयस्कान्तः, पुं, (अयसु कान्तः रमणीयः।) लौहविशेषः। कान्तलौह इति ख्यातः। तत्पर्य्यायः। कान्तलौहं २ कान्तं ३ लौहकान्तकं ४ कान्तायसं ५ कृष्णलौहं ६ महालौहं ७। अस्य गुणाः। तीक्ष्णत्वं। उष्णत्वं। रूक्षत्वं। पाण्डुशोषकफपित्तहरत्वं। रसायनत्वं। अनुत्तमत्वञ्च। स चतुर्व्विधः। भ्रामकः १ चुम्बकः २ रोमकः ३ स्वेदकः ४। एते रसायने उत्तरोत्तरगुणिनः।
"क्रमेण दार्ढ्याङ्गकान्तिकार्ष्ण्यनीरोगदायिनः"।
इति राजनिर्घण्टः॥ चुम्बकप्रस्तरोऽप्ययं। (चुम्बक